नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

Question Booklet No.

No. of Questions – 19

No. of Printed Pages – 11

**SS-12-Sanskrit Sah.**

# उच्च माध्यमिक परीक्षा, 2026

# SENIOR SECONDARY EXAMINATION, 2026

# संस्कृतसाहित्यम्

**समय : 3:15 (सपादत्रिवादनम्)**

**पूर्णाङ्क : 80**

**परीक्षार्थिभ्य: सामान्य निर्देशा :**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांक: **अनिवार्यत:** लेख्य: ।

2) **सर्वे** प्रश्ना: अनिवार्या: ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्डः – 'अ'

**1.** बहुविकल्पात्मकप्रश्नाः । **[1×12=12]**

i) कया अमृतम् अश्नुते ? **[1]**

अ) सुधया ब) विद्यया

स) अविद्यया द) पूजया

ii) ''कर्मगौरवम्'' इति पाठः कुतः सङ्कलितः ? **[1]**

अ) उत्तररामचरितत: ब) रघुवंशत:

स) श्रीमद्भगवद्गीतात: द) रामायणत:

iii) चन्द्रापीडं कः उपदिशति ? **[1]**

अ) तारापीड: ब) शुकनास:

स) लक्ष्मी: द) राजा

iv) कः परमापदां पदम् ? **[1]**

अ) अविवेक: ब) परिश्रम:

स) विवेक: द) उपाय:

v) ''कार्यं वा साधयेयम्, देहं वा पातयेयम्'' इति उक्तिः अस्ति । **[1]**

अ) शिववीररस्य ब) कविवरस्य

स) गुप्तचरस्य द) प्रजाजनस्य

vi) ''चित्तवृत्तिनिरोधः'' इति किम् उच्यते ? **[1]**

अ) योग: ब) यम:

स) नियम: द) अपरिग्रह:

vii) ते अधिकारः कुत्र वर्तते ? **[1]**

अ) शयने ब) कायेत्यागे

स) निन्दने द) कर्मणि

viii) मगणस्य चिह्नम् अस्ति । [1]

अ) ।ऽऽ  ब) ऽऽऽ

स) ऽ।ऽ  द) ऽऽ।

ix) ''इकोयणचि'' इति सूत्रस्य उदाहरणम् अस्ति । [1]

अ) श्रीश:  ब) गङ्गोदकम्

स) सुध्युपास्य:  द) दैत्यारि:

x) ''रामश्शेते'' इत्यत्र क: सन्धि: वर्तते ? [1]

अ) श्चुत्वम्  ब) ष्टुत्वम्

स) जश्त्वम्  द) अनुस्वार:

xi) हरिं वन्दे । अत्र सन्धिविधायकं सूत्रं किम् ? [1]

अ) ष्टुनाष्टु:  ब) मोऽनुस्वार:

स) स्तो: श्चुनाश्चु:  द) झलां जशोऽन्ते

xii) कस्मिन् अलङ्कारे सम्भावना भवति ? [1]

अ) अनुप्रासे  ब) रूपके

स) दीपके  द) उत्प्रेक्षायाम्

**2.** कोष्ठकनिर्देशानुसारं रिक्तस्थानानि पूरयत । **[1×5=5]**

i) अयि जात ! ________________ कथय । (कथ् + तव्यत्) [1]

ii) न ________________ आकर्णयति । (श्रु + क्त) [1]

iii) मम जीवनप्रदीयो निर्वापितो ________________ इच्छति । (भू + तुमुन्) [1]

iv) इति जलमध्ये पुष्पाञ्जलिं ________________ क्षणं स्थित: । (दा + क्त्वा) [1]

v) तस्य ________________ सह अस्ति कश्चित् सम्पर्क: । ('राज्य' इति शब्दे उचितविभक्तिं संयोज्य लिखत) [1]

3. अधोलिखितरेखाङ्कितशब्दान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत । [1×2=2]

क) धिक् त्वाम् । [1]

ख) नमोऽस्तु अनन्ताय । [1]

4. अधोलिखितपद्यांशे अलङ्कारस्य नामोल्लेखं कुरुत । [1]

श्रुतप्रकाशं यशसा प्रकाशः

## खण्डः – 'ब'

5. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत । [2×4=8]

क) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति ? [2]

ख) बाणभट्टस्य प्रसिद्धाः रचनाः काः ? [2]

ग) श्रीचन्द्रशेखरदासवर्मणः प्रसिद्धौ कथासङ्ग्रहौ कौ ? [2]

घ) 'शिवराजविजय' नामकस्य प्रसिद्धस्य उपन्यासस्य रचयिता कः ? [2]

6. अधोलिखितयोः छन्दसोः **एकस्य** छन्दसः लक्षणम् उदाहरणञ्च लिखत । [2]

क) वसन्ततिलका

ख) उपेन्द्रवज्रा

7. अधोलिखित श्लोकांशयोः **एकस्य** गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत । [2]

क) हंसो यथा राजतपञ्जरस्थः ।

ख) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।

8. अधोलिखित श्लोकस्य अन्वयं लिखत । [2]

अस्ति यद्यपि सर्वत्र नीरं नीरज–राजितम् ।
रमते न मरालस्य मानसं मानसं विना ।।

9. अधोलिखित पद्यांशयोः **एकस्य** हिन्दीभाषयां सप्रसङ्गं भावार्थं लिखत । [2]

क) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

ख) सन्मित्र लक्षणमिदं प्रवदन्ति सन्तः ।

**10.** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत ।

यद्यपि लोभवशात् जनाः कार्यशीलाः भवन्ति परन्तु यदा अतिलोभः भवति तदा जनाः दुष्टानि कर्माणि कुर्वन्ति, चौर्यं कुर्वन्ति, हत्यां कुर्वन्ति । अतिलोभस्य सीमा नास्ति । मृगतृष्णावत् अतिलोभः अधिकाधिकं वर्धते । अन्ते मनुष्यः पूर्णतया नष्टः भवति । अतिलोभः विनाशकारकः एव । अतः विद्वांसः अतिलोभं न कुर्वन्ति कदापि ।

क) एकपदेन उत्तरत । **[1×2=2]**

i) कस्य सीमा नास्ति ? **[1]**

ii) अतिलोभः कथं वर्धते ? **[1]**

ख) पूर्णवाक्येन उत्तरत । **[2]**

अतिलोभितजनाः कीदृशानि कार्याणि कुर्वन्ति ?

ग) भाषासम्बद्धकार्यम् । **[1×3=3]**

i) नास्ति इति क्रियापदस्य कर्तृपदं किम् ? **[1]**

ii) अतिलोभः विनाशकारकः एव अत्र विशेषणपदं किम् ? **[1]**

iii) 'मूर्खाः' इति पदस्य विलोमपदं किम् ? **[1]**

घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **[1]**

## <u>खण्डः – 'स'</u>

**11.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

सोऽपि समुद्रतीरं गत्वा गन्धपुष्पादिषोडशोपचारं विधायाब्रवीत् ''भोः समुद्र ! विक्रमार्को राजा यज्ञं करोति । तेन प्रेषितोऽहं त्वामाह्वातुं समागतः ।'' इति जलमध्ये पुष्पाञ्जलिं दत्वा क्षणं स्थितः । कोऽपि तस्य प्रत्युत्तरं न ददौ । ततः उज्जयिनीं यावत्प्रत्यागच्छति तावद्देदीप्यमानशरीरः समुद्रो ब्राह्मणरूपी सन् तमागत्यावदत ''भो ब्राह्मण, विक्रमेणास्मानाह्वातुं प्रेषितस्त्वं, तर्हि तेन या अस्माकं सम्भावना कृता सा प्राप्तैव । एतदेव सुहृदो लक्षणं यत्समये दानमानादिकं क्रियते ।''

क) एकपदेन उत्तरत । **[1]**

कः ब्राह्मणरूपं धृत्वा अवदत् ?

ख ) पूर्णवाक्येन उत्तरत । [2]

सुहृद: लक्षणं किम् ?

ग ) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) [1×2=2]

i) एतदेव सुहृद: लक्षणम् । अत्र विशेषणपदं किम् ? [1]

अ) लक्षणम्   ब) एव

स) एतद्   द) सुहृद:

ii) कोऽपि तस्य प्रत्युत्तरं न ददौ । अत्र क्रियापदं किम् ? [1]

अ) उत्तरम्   ब) ददौ

स) तस्य   द) न

**अथवा**

भगवान् यीशुस्तव मङ्गलं वितनोतु । मम पूर्वतनं पत्रं त्वया प्राप्तं स्यात् । तव समीपे इदं मम शेषपत्रम् । यतो हि मम जीवनप्रदीपो निर्वापितो भवितुमिच्छति । प्रायस्तवागमनसमये अहं न स्थास्यामि । पूर्वपत्रे–अहमाश्रमस्य सर्वविधमायव्ययाकलनं प्रेषितवती । केवलं यीशो: समीपे गमनात्पूर्वं तव दर्शनमिच्छामि । प्रथमं त्वया निर्मितोऽनाथाश्रमोऽधुना महाद्रुमेण परिणत: । अधुनात्र शताधिका अनाथशिशवो लालिता: पालिताश्च भवन्ति ।

क) एकपदेन उत्तरत । [1]

भगवान् यीशु: किं वितनोतु ?

ख) पूर्णवाक्येन उत्तरत । [2]

अधुना क: महाद्रुमेण परिणत: ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) [1×2=2]

i) अनाथशिशव: इति विशेष्यपदस्य विशेषणपदं किम् ? [1]

अ) गर्विता:   ब) लालिता:

स) प्रसन्ना:   द) उपर्युक्तानि सर्वाणि पदानि

ii) स्थास्यामि इति क्रियाया: कर्तृपदं किम् ? [1]

अ) अहम्   ब) त्वम्

स) वयम्   द) ते

**12.** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः ।

शरीरयात्रापि च ते न प्रसिद्ध्येद कर्मणः ।।

क) एकपदेन उत्तरत । **[1]**

ज्यायः किम् ?

ख) पूर्णवाक्येन उत्तरत । **[2]**

अकर्मणः किं न सिद्धयेत् ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) **[1×2=2]**

i) ''नियतं कुरु कर्म त्वम्'' अत्र क्रियापदं किम् ? **[1]**

अ) नियतम्　　ब) कुरु

स) त्वम्　　द) कर्म

ii) 'कर्म ज्यायः हि अकर्मणः' अत्रः ज्यायः इति पदस्य विशेष्यपदं किम् ? **[1]**

अ) हि　　ब) ज्यायः

स) कर्म　　द) अकर्मणः

**अथवा**

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।

विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ।।

क) एकपदेन उत्तरत । **[1]**

हंसः कस्मिन् आलस्यं न कुर्यात् ?

ख) पूर्णवाक्येन उत्तरत । **[2]**

'नीरक्षीरविवेकः' इति कस्य कुलव्रतम् अस्ति ?

ग ) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) **[1×2=2]**

i) त्वमेव तनुषे चेत् । अत्र क्रियापदं किम् ? **[1]**

अ) त्वम् ब) चेत्

स) एव द) तनुषे

ii) अत्र 'स्फूर्तिः' इति शब्दस्य विलोमपदं किं प्रयुक्तम् ? **[1]**

अ) कुलव्रतम् ब) आलस्यम्

स) विश्वस्मिन् द) चेत्

**13.** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत ।

अरुन्धतीजनकौ : महत्कौतुकं वत्सस्य ।

कौशल्या : अरण्यगर्भरुपालापै यूयं तोषिता वयं च । भगवति ! जानामि तं पश्यन्ती वञ्चितेव । तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम् ।

अरुन्धती : अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते ? (प्रविश्य)

बटवः : पश्यतु कुमारस्तावदाश्चर्यम् ।

लवः : दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

बटवः : कथं ज्ञायते ?

क) एकपदेन उत्तरत । **[1]**

यूयं वयं च कैः तोषिताः ?

ख) पूर्णवाक्येन उत्तरत । **[2]**

लवः अश्वविषये किं ज्ञातवान् ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) **[1×2=2]**

i) सः चपलः कथं दृश्यते ? अत्र क्रियापदं किम् ? **[1]**

अ) चपलः ब) कथम्

स) सः द) दृश्यते

ii) 'अतिवेगेन' इति पदस्य अत्र पर्यायपदं किम् ? **[1]**

अ) अतिक्रान्तः  ब) अतिकार्येण

स) अतिजवेन  द) अतिधनेन

**अथवा**

स्वप्निलः – बलराम ! अद्य कक्षायां कोऽपि विशिष्टः कार्यक्रमः ?

बलरामः – अरे मित्र ! त्वं न जानासि ? इदानीं तु योगशिक्षायाः कालांशः ।

मोहिनी – एषः तु नूतनः विषयः । किं प्रतिदिनम् ईदृशी कक्षा प्रचलिष्यति ?

बलरामः – आम्, अधुना तु अस्माकं कृते योगशिक्षा अतीव उपयोगिनी अस्ति ।

सागरिका – अहो ! सुखदमाश्चर्यम् । अहमपि गृहे मातुः मुखाद् योगशिक्षायाः विषये श्रुतवती । तया उक्तम् 'योगः स्वास्थ्यकर : ।'

सागरः – किं विद्याध्ययनेऽपि अस्योपयोगः वर्तते ?

मोहिनी – आम् अस्मिन् विषये योगशिक्षकः विशेषरूपेण वदिष्यति ।

क) एकपदेन उत्तरत । **[1]**

कः स्वास्थ्यकरः वर्तते ?

ख) पूर्णवाक्येन उत्तरत । **[2]**

सागरिका योगशिक्षायाः विषये कुतः श्रुतवती ?

ग) भाषिककार्यम् (शुद्धम् उत्तरं चित्वा लिखत) **[1×2=2]**

i) 'तु नूतनः विषयः' अत्र विशेषणपदं किम् ? **[1]**

अ) नूतनः  ब) विषयः

स) तु  द) न किमपि

ii) किं विद्याध्ययनेऽपि अस्योपयोगः वर्तते ? अत्र क्रियापदं किम् ? **[1]**

अ) किम्  ब) उपयोगः

स) वर्तते  द) अस्य

**14.** रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत । (केषाञ्चित् **त्रयाणाम्**) **[1×3=3]**

क) तच्छ्रुत्वा राजा <u>तूष्णीम्</u> आसीत् ।

ख) <u>शिववीरचर:</u> स्वकार्याद् न विरमति ।

ग) श्रीनायार: <u>स्वल्पभाषी</u> आसीत् ।

घ) <u>चित्तवृत्तिनिरोध:</u> योग: कथ्यते ।

ङ) चातक: <u>शरद्घनं</u> न याचते ।

**15.** 'शुकनासोपदेश:' अथवा 'दीनबन्धु: श्रीनायार:' पाठस्य सारं हिन्दीभाषया लिखत । **[3]**

**16.** अधोलिखितयो: अलङ्कारयो: कस्यचिद् **एकस्य** लक्षणम् उदाहरणं च लिखत । **[3]**

क) अनुप्रास:

ख) रूपकम्

**17.** प्रदत्तरूपरेखया कथासंयोजनं कृत्वा लिखत । **[4]**

एकस्मिन् ग्रामे सौचिक: ________________ स्म । तस्य वस्त्रसीवनस्य ______________ आसीत् । तत्र प्रतिदिनम् ________________ गज: आयाति स्म । स: तस्मै रोटिका: ______________। गज: रोटिका: खादित्वा तस्मै ________________ ददाति स्म । गच्छताकालेन एकदा सौचिकेन ________________ शुण्डायां सूचिकया ____________ कृत: । दु:खित: क्रुद्धश्च गज: ________________ गत्वा मलिनं ________________ शुण्डायां पूरयित्वा ________________ आपणे क्षिप्तवान् । सौचिकस्य वस्त्राणि मलिनानि जातानि ।

**अथवा**

अधोलिखितानि क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत । **[4]**

क) एकस्मिन् वने एक: चपल: वानर: वसति स्म ।

ख) तत्र एकेन वृद्धकपोतेन उपायं सूचयित्वा उक्तम् अहं सर्वान् कष्टमुक्तान् करोमि ।

ग) सर्वे खगा: तस्य दुर्व्यवहारेण पीडिता: जाता: ।

घ) सच अन्यान् वन्यप्राणिन: पीडयति स्म । खगानां मीडानि नाशयति स्म ।

ङ) कपोतेन उक्तं मातुल ! मधुमक्षिकाणां गृहं सुरक्षितमत: इमा: उपहसन्ति ।

च) ते कष्टोपायविषये गोष्ठीम् अकुर्वन् ।

छ) मधुमक्षिका दंशेन पीडित: वानर: मृत: ।

ज) वानरेण मधुमक्षिकाणां गृहं खण्डितम् ।

**18.** निम्नलिखितयो: कमपि **एकं** विषयं स्वीकृत्य **50-60** शब्देषु संस्कृतभाषाया निबन्धं लिखत । **[4]**

क) स्वतन्त्रता दिवस:

ख) मम प्रिय: कवि:

**19.** अधोलिखित वाक्यानां संस्कृतभाषाया अनुवाद: करणीय: । (केषाश्चित् **चतुर्णाम्**) **[1×4=4]**

क) उद्यान में पुष्प खिल रहे हैं ।

ख) हम सब प्रात: योगाभ्यास करते हैं ।

ग) मुझे सुभाषित अच्छा लगता है ।

घ) वृक्ष सभी को प्राणवायु देते हैं ।

ङ) मैं कल आऊँगा ।

च) विद्याधन ही सुरक्षित धन हैं ।

DO NOT WRITE ANYTHING HERE